कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्रीगणेशाय नमः॥ श्रीगोकुलेशपदपद्ममधुव्रतेन तारामभिधेन कविना शिवरामधाम्ना ॥ विदग्धलोकोपकृतये क्रिय-
ते स्फुटबोधिनी टीका विदग्धमुखमंडनसंज्ञकस्य ॥१॥ विमत्सराणां विदुषां विनोदी कामपास्तां ॥ सुदुर्धियोनुतां निम-
त्यां विदग्धमनोहरा ॥२॥ जैनकृतोस्मिन्ग्रंथे संग्धमूढज्ञातुमनेनोपदर्शिता ॥ विदग्धमनोहराख्यां स्फुटहृद्यं यमेतद्ग्र-
कुरुते ॥३॥ इह ग्रंथस्य कर्ता निर्विघ्नपरिसमाप्त्यर्थं कायिकवाचिकमानसिकपापापहारित्वरूपं स्वेष्टदेव-
ताप्रणामं मंगलमाचरति ॥ सिद्धौषधानीति ॥ शौद्धोदनेः शाक्यमुनेः प्रवचनानि प्रकृष्टानि वचनानि

॥सिद्धौषधानि भवदुःखमहागदानां पुण्यात्मनां परमकर्णरसायनानि ॥ प्रक्षालनैकसलिला॥
॥निमनोमलानां शौद्धोदनेः प्रवचनानि चिरंजयंति ॥१॥

वचनानि जैनसूक्तानीति यावत् ॥ चिरं चिरकालं तत्पर्यंतं सर्वोत्कर्षेण वर्त्तंत इत्यर्थः ॥ शाक्यमुनिस्तु यद्व्यम-
रः ॥ कीदृशानि प्रवचनानि भवदुःखमहागदानां सिद्धौषधानि ॥ भवस्य संसारस्य जन्मनो वा दुःखान्येव महा-
रोगा महारोगास्तेषां सिद्धौषधानि औषधानि रसयोगाये प्रकारहितानीत्यर्थः ॥ भवः क्षेमेशसंसारसत्ता-
सु प्राप्तजन्मासु इति मेदिनी ॥ रोगव्याधिगदामयइत्यमरः ॥ महारोगास्तु रोगा भवंति ॥ एतेन कायिकपापाप-
हारित्वमुक्तं भवति ॥ पुनः कीदृशानि ॥ पुण्यात्मनां परमकर्णरसायनानि ॥ पुण्यात्मनां सुकृतिनां परमानि उत्कृष्टा-

१

Acc. No. ~~1452~~
Title - विदग्ध मुख मण्डन
~~Author~~ - धर्मदास.
~~Date~~ - ?
Sub - Poetry.
folio - ३९.
Xerox - ~~77~~

K K S U LIBRARY
RAMTEK
441 106
M-1561
Dist. Nagpur

Checked 2012

निर्मलानि कर्णयोः रसायनानि श्रवणपुटपेयानीत्यर्थः ॥ साधूनां हितं कर्णद्वारा भवति। एतेन वाचिकपापहारित्वमुक्तं ॥ पुनः कीदृशी। मनोमलानां प्रक्षालनैकसलिलानि। मनसि स्थितो मलो येषां ते मनोमलाः। मलिनचित्ताः तेषां प्रक्षालनं प्रकर्षेण क्षालनं निर्मलीकरणं तदर्थमेका निश्चला निपुणस्यानीति यावत् ॥ एके मुख्यान्यकेवला इत्यमरः ॥ मनोनिर्मलीकरणान्मानसिकपापहारित्वमुक्तं ॥ नन्वत्रौदृशैः स्वरूपादितत्कर्मप्रशंसादिकमनुक्त्वा वचिस्तरवचनप्रशंसा कथमुक्तेत्युच्यते ॥ महापुरुषाणां स्वरूपादिकं तत्क्रियादिकं च सर्वमेकैकस्यापि कोटिकल्पैर्वा वक्तुं न शक्यमेव। तदुक्तं भागवते ईश्वराणां वचः सत्यं तथैवाचरितं क्वचिदिति ॥ सज्ञानां वचनं तथ्यमिति स्मृतेः ॥ एतेन महासाधुवाक्यपरिपालनद्वारा सकलाभीष्टसिद्धिः सूचितेति भावः ॥ संगः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ॥ स सद्भिः सह कर्तव्यः संतः संगस्य भेषजमिति निरुक्तं ॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहमिति दुर्वाससं प्रति विष्णूक्तेश्च स्वस्याकृविस्या अद्वितीयभक्ता दैन्येन साधून् स्तौतीति ॥१॥ जयंतीति ॥ सुकृतस्य पुण्यस्य केतनं भाजनं यथा स्यात्तथा स्यात्तथा संतः साधवो जयंति ॥ कीदृशाः संतः। परार्थसंपादनसद्भूतस्थिताः ॥ सत्साधौ विद्यमाने चेत्यमरः ॥ एवंविधान् साधून् प्रलसच्छ्लोका दैन्यवचोगिरिः प्रस्तौति ॥ क्रूरस्येति ॥ क्रूरे रक्तीति वृत्तीति क्रूरस्य ॥ क्रूरस्य पतत्रारं [illegible] लेन च क्रूरस्य नीरं क्रूरस्थला रस्य उपमायलिन तत्क्रूरस्य नीरोपमं तथा निम्बं गुननं पच्यतीति क्रूरस्य नीरोपमावि

२

न्यदर्शिनः कवेः पंडितस्य संख्यावान् पंडितः कविरित्यमरः ॥ गिरः सरस्वत्यो जयंति गीर्वाग्वाणी सरस्वतीत्यमरः ॥ कीदृश्यो गि
रः वैदग्ध्यस्य चतुरस्य भावो वैदग्ध्यं चातुर्यं तेन भरसा निर्यासा ता ॥ चातुर्यविशेषोल्लासमा इत्यर्थः ॥ २ ॥ इदानीं खलानां मु
खे वर्तमानामपि परगुणकथनाल्लसा जिह्वामालोक्य कविः साश्चर्यमुत्प्रेक्षते इति तृतीयश्लोकेनाह ॥ आकालेति ॥ ख
लमुखे खलानां मुखे दुर्जनानां वदने सतीमपि घमानामपि जिह्वा रसना परगुणान् परेषां गुणान् कथं कथयितुमकान
समर्था जातो लोहशलाकया लोहस्य कीलेन विद्धा नु नास्ति ॥ विद्धेव यथा विद्धा कीलिता भवति तथा संलक्ष्यत इत्याश्च
॥ जयंति संतः सुकृतैकभाजनं परार्थसंपादनसद्व्रतस्थिताः ॥ करस्थनीतोपमविश्वदृश्वनो जयंति वैदग्ध्य ॥
॥ गुणः कवेर्गिरः ॥ २ ॥ ॥ ॥ यं ॥ पिशुनो दुर्जनः खलस्त्यमरः ॥ अत्याश्चर्यमिति विस्मिता पुनः पुनरुत्प्रे
क्षते ॥ किंच महोपलेन महता पाषाणेन सेतुबंधनावसरे हनुमता द्विभिः आक्रांता संघीकृता ॥ पाषाणः प्रस्तरग्रा
वा पत्थर उपलः इत्यमरः ॥ किंवा दुर्वासमुनिना शापिता अघोरस्य च मयाकस्या पिशुना न वाच्या इति ॥ एवंविधः
शापेन ग्रस्ता ॥ तः ॥ पापे वसंलस्य ता ॥ किंवा सततस्वभावः सातत्यं नैरंतर्यमिति यावत् ॥ न तेति खेदेन तुलाना
पासु निर्लिता सुंदरी कृता ॥ यथा प्रमाणपत्रादिषु लेखासु द्राक्षियते तथा कृता किं ॥ किं वा समुद्रमथनावसरे ॥ द्विजिह्वोसर्प
स्तनकाविल्लकेः सर्पाणां विषैरेवा हलगादिभिः खलानां जिह्वापि मूर्छिता नीता प्राप्तिता ॥ किं वा तत्रैव सर्परूपैरंतकुरुस्ततु

२

3

भिः स्थूलसूक्ष्मभेदैर्बहुधा तिष्ठती अतः परेषां गुणान्कथयितुमक्षमेत्यर्थः ॥३॥ नहि सर्वे खला भवंति इह खलु नाकृतिः पुरुषेषु
मध्यमो धर्मो नाम भेदेन त्रैविध्यं प्रदर्शयन्नाह ॥ इहेति ॥ इह लोके कृतं जानंतीति कृतज्ञाः अनेके बहवः पुरुषाः सततं स
र्वदा उपकर्मणि पुरुषेषु परस्तिं प्रत्युपकारं कुर्वंतः क्रियमाणानिच्छंतीति संत उपकारिषु यः साधुः साधुत्वे तस्य को गु
णः इति स्मृतेः तस्मादेवंविधा मध्यमा जगति संसारेऽनेके सुधियो व्यवहारचातुरी युक्ता धीर्येषां ते सुधियो व्यव
हारकुशला निवसंत्येवेति सस्य ॥ एवं कारेण धारणे ॥ आत्मार्थे को न जीवतीति स्मृतेस्तस्मादेते निरुपकाः ॥ ते यथा

॥आक्रांतेन महोपलेन मुनिना शापेन दुर्वाससा सातत्येन समुद्रितेन जतुना नीतेन वज्रच्छविं विषैः ॥ बद्धेवात ॥
॥गुरुभिः परगुणान्वक्तुं नशक्ता सती जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥३॥ इह लोके ।
॥सत्यं सततमुपकारिण्युपैरतिं कृतज्ञाः कुर्वंतो जगति निवसंत्येव सुधियः ॥ कियंतस्ते संतः सुकृतपरिपा ।
॥कप्रणयिनो विना स्वार्थं येषां भवति परस्य व्यसनिता ॥४॥६॥ ॥विधाः संतः सत्पुरुषाः कियंतो विर

ला इत्यर्थः ॥ ते के ॥ येषां स्वार्थं विना परस्य व्यसनिता । व्यसनं विपद् अस्यास्तीति व्यसनी । व्यसनिनो भावः व्यसनिता ।
परोपकारस्य परस्य व्यसनिता । परस्य व्यसनिता भवति । व्यसनं विपद्भ्रंश इत्यमरः । कीदृशाः संतः । सुकृतपरिपाक
प्रणयिनः । सुकृतस्य सुष्ठु कर्मणः परिपाके फलनिष्पत्तौ प्रणयः प्रेमा येषां ते सुकृतपरिपाकप्रणयिनः । प्रणयास्त्वमी वि
श्रंभयाच्याप्रेमाण इत्यमरः ॥ एते उत्तमाः पुरुषा उक्ताः । साधवो विरला इति नीतावप्युक्तं । साधवो नहि सर्वत्र चंदनं न

4

२

वनेवनइति।।एकेसत्पुरुषाःपरार्थघटकाःस्वार्थंपरित्यज्ययेसामान्यास्तुपरार्थमुद्यमभृतःस्वार्थाविरोधेनये।तेमीमानुष
राक्षसाःपरहितंस्वार्थायनिघ्नंतियेइतिभर्तृहरिणात्रैविध्यमुक्तं।।ँ।।परस्वगुणदोषांश्चनप्रशंसेन्नगर्हयेतइतिभागव
तोक्तंसंचिंत्यप्रवीणःकौखलसुजनौयुगपन्नमस्कुर्वन्नाह।एषइति।।एषप्रत्यक्षसिद्धोंजलिर्मयाबद्धः।किमर्थमित्यपेक्षेतौ
पूर्वोक्तौअसज्जनसज्जनौखलसुजनौ।सभयंविशेषंवंदेनमस्करोमि।कीदृशौतौ।नितांतकुटिलप्रगुणस्वभा
वौनितांतमत्यर्थं।कुटिलोवक्रःप्रगुणऋजुश्चस्वभावौययोस्तौ।आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि।ऋजाव

।।एषोंजलिःसभयमसज्जनसज्जनौतौवंदेनितांतकुटिलप्रगुणस्वभावौ।।एकोभियातिनिरभिसंधितवैरिभूतं
।।श्रीसापरंपरमनिर्वृतिपात्रभूतां।।५।५७।

।।जिह्मप्रगुणावित्यमरः।।उभयोरभिवादनेव्यवस्था
माह।।एकमिति।।तयोर्खलसुजनयोर्मध्येएकंप्रथमंअसज्जनंखलंअभियाभीत्यावंदे।भीतिर्भीःसाध्वसंभयमित्य
मरः।।कीदृशमेकं।निरभिसंधितवैरिभूतं।निरभिसंधितंअभिसंधानंकर्तुमशक्योयोवैरीरिपुस्तस्यायंभू
भूतस्तुल्यमेषांदुःसंधानश्चदुर्जनोभवतीतिभर्तृहरिः।।अपरंद्वितीयंसज्जनंप्रीत्याहर्षेणवंदे।कीदृशमपरं।पर
मनिर्वृतिपात्रभूतां।परमोन्यासौनिर्वृतिश्चपरमनिर्वृतिः।परमनिर्वृतेःपरमसुखस्यपात्रभूतंभाजनमित्यर्थः।।
खलसुजनौस्वभावेनतौदुःखसुखहेतूभवतइतिभावः।उक्तंचनीतौपरोद्वेगपरानंदखलसज्जनयोर्द्वयोः।स्वभावएवकारण

[illegible]

३

य घ
अभिसंघातग्राम्यश्चोत्स्वलत्साहात दभिधादनेन मम किं स्यात् इत्यत आह ॥ किमिति ॥ अथ चेति पक्षांतरं । छुदुरिति मेघघै
यदि सगुणज्ञः गुणानुज्ञानातीति गुणज्ञः सुजनः साधुः मां स्वानुभावेन स्वीकरोति स्वकीयत्वेन नांगीकरोति । तदा हतख
लप्रणतावपि । हतमोयः खलः हतखलः हतखलस्य प्रणतिः हतखलप्रणतिः तस्यां हतखलप्रणतौ धि
क्कृतखलजनमस्कारोपि मे मम किं स्यादपि तु न किमपि तत्र दृष्टांतमाह ॥ चारुचरितेन ॥ चारुहृद्येजगदाल्हादकंचशि
तं चनोयस्य स चारुचरितः तेन चारुचरितेन चंद्रेण विकासितं विकासभावं प्राप्तं सत्कुमुदकैरवं । सिते कुमुदे कैरव
श्र= ॥ किं मे घैवा हतखलप्रणतावपि स्यात् सत्स्वीकरोति सुजनः छुदुमां गुणज्ञः ॥ चंद्रेण चारुचरितेन विकासितं स
संकोचितं भवति किं कुमुदं तमोभिः ॥ ६ ॥ प्रीत्यै सतां तनुभावगतावसादः संसृज्यगद्रचनो प्रतिभाङ्कुरू
पं ॥ क्षिप्रावबोधकरणं समभीप्सितार्थं वक्ष्ये विदग्धमुखमंडनमप्रपंचं ॥ ७ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥
मित्यमरः । तमोभिरंधकारैः संकोचितं किं भवति । अपि तु न भवत्येव । तथा मत्कृतकाव्यगुणज्ञो यदि सौहृत्येन स्वीक
रोति तदुर्जनानंगीकारे मम का क्षतिरिति भावः ॥ ६ ॥ सुजनस्वीकारबलमवलंब्य कविर्ग्रंथस्याभिधानं प्रकटय
न्नाह ॥ प्रीत्यै सतामिति ॥ प्रतिभा बुद्धेरुत्कर्षस्तस्यानुरूपं यथा स्यात्तथा । अहं विदग्धमुखमंडनं नाम काव्यं वक्ष्ये ॥ कि
रूसाग्रहच्चैरेनां दुर्ग्रंथभावनां संसृज्य त्यक्त्वा । किमर्थं सतां प्रीत्यै । सतां साधूनां प्रीत्यै परितोषाय । कीदृशोहं । तनुभा
वगतावसादः तेषां साधूनामनुभावो नुग्रहस्तनुभावस्तेन गतः अवसादो विषादो यस्य सः । कीदृशं विदग्धमुखमंडनं ।

४

शिष्यावबोधकरणक्षमं। क्षिप्रं शीघ्रं अवबुध्यत इत्यवबोधः। सम्यग्ज्ञानं तत्करणे तत्संपादने क्षमं समर्थं। पुनः कीदृशं।
ईप्सितार्थं। ईप्सितः अभिलषितोऽर्थो यस्मिन्। विस्तराल्लघीक्षितार्थमिति चेत्तत्राह। अप्रपंचेन विघ्नेत प्रपंचो विस्ता
रो यस्मिन् तत्। अविस्तारमित्यर्थः। विपर्यासे च विस्तारे प्रपंच इत्यमरः॥७॥ अधुना ग्रंथकारो ग्रंथप्रचारार्थं विद
ज्जनो रंजयन् स्वाभिप्रायमाह॥ यदीति॥ हे सुधियः सुजनाः विमत्सरा इति यावत्। विद्वांसो वा सभामध्ये स्था
तुं वक्तुं मनस्विनः तयघाति। सभा सोभरा। हे स्वे वसभापास्थानमेतत्त्वंति स्तां विदुषां मध्ये धाष्ट्र्यं नवकं ज्ञाति
॥यद्यस्ति सभामध्ये स्थातुं वक्तुं मनस्तरां सुधियः॥ तां कलामिव गहीत्वा विदग्धमुखमंडनं विज्ञेयुः ८।
॥आर्या स्यात्सम स्यान्च २ द्विर्व्यस्तां ३ द्विः समस्तकं ४॥ तथाप्यन्ये सम सेन्ये ५ द्विर्व्यस्तकं समस्तकं॥६।७॥
॥द्विः समस्तकयस्ता ७ मैत्री लापुष्पभिन्नकं॥९॥ नुष्टुभेदकाः मोज स्त्री ११ सोलेखा १२ रंसकौतुकं॥१३।१४॥
॥प्रमाणी नारसमं १४ प्रमाणी १५ भम्बोत्तर १६ तथा। आदिमध्योत्तराख्ये द्व १७।१८ अंतोत्तरमतः परं॥१९।१५॥
॥कृत्यिलापन्तु २० तिरश्चेव विषमं २१ वृत्तनामकं २२ नुगमस्यात्तस्त्र्यंचतो कृं २४ चसोत्रं २५ गौरी यमकखंजे २७॥१२॥
॥वर्णमाख्यातस्रैर २८ नेह श्लोकोत्तर २९ मतः परं॥ खंडपादो हरे ३१।३२। चक्रं ३३ पद्मं ३४ काकपदं ३५ तथा गोमूत्री ३६ स
र्वतोभद्रो यत्र भवति॥ तां कलंगदीत्वा यथा सहृदस्तिगंम्यतेतत्थेदं विदग्धमुखमंडनं गहीत्वा अवधार्य विज्ञेयुः। उपविष्टो भू
वत। विस्तरेऽपवर्गाने॥८॥ अथैवरम्भेन क्षमाणान्यनुक्रमात् आह यदीति॥ तदिदं इति शेषः॥ अक्षराणां लक्षणमयैवक्ष्य

वर्णानिरेखास्योचस्वेति द्व।१

खंडोत्तरं पादोनारं चेति द्व।२

आद्युत्तरं मध्योत्तरं चेति द्व।५

शाब्दीयं रासकजं चेति।४

॥श्रुतबोधटीका॥४॥

४

7

१५॥ पदपादार्थगूढकं॥ पदगूढं॥ पादगूढं॥ अर्थगूढं मिश्रयं॥ अपह्नुतिसहितं बिंदुमदित्यर्थः॥१६॥ लिंगसुब्वचनस्य च॥ लिंगगुप्तं
सुब्वचनगुप्तं॥ चकारालिङ्वचनगुप्तं चेति त्रयं॥१७॥ चकारात्स्वरस्थानव्यंजनयोश्च्युतकं ज्ञेयमित्यर्थः॥१८॥ दत्तु देवाः॥ अत्र ताव
देकेन व्यस्तसमस्तजातीयोलक्षणमाह॥ पद्मेति॥ विभक्त्यंतं पदं॥ केवलेन पदविभागेन पदानां विभागः पदविभागस्तेन
यत्स्पष्टं प्रश्नं अन्यविशेष्यस्तं विदुर्जानीयुः॥ विदुहोनो पदविभागमकृत्वा यत्समुदायेन समस्तेन पदेन पृच्छ्यते प्रश्नः क्रिय
ते तं प्रश्नं समस्तसंज्ञकं विदुरित्यर्थः॥१९॥ तत्र व्यस्तसमस्तप्रश्नयोर्मध्ये तावद्व्यस्तयोदाहरणद्वये प्रथमस्योदाहरणमाह॥१९

विविधमित्यर्थः

॥ वीतोत्तरं ३७ गतप्रत्यागतं ३८ बैंदु॥ वर्धमानाक्षरं ३९ तद्दीपमानाक्षरं ४० तथा॥१४॥ शृंखलं ४१ नागपाशं च ४२
॥ चित्रं ४३ संसुद्धं ४४ मेवं च॥ प्रहेलिका ४५ तथा ह्य ४६ कालसारा ४७ द्यूणितिं ४८॥१५॥ अजमारादि कूगूढं ४९ पदे
॥पादार्थगूढकं॥ ५०।५१।५२॥ स्तुतिनिंदा ५३ तथा न्यार्थं ५४ सहापह्नुतिबिंदुमत्॥१६॥ क्रियाकारकसंबंधगुप्ता ५६।
॥५७।५८ न्यामंत्रितस्य च॥५९॥ गुप्तं तथा समासस्य ६० लिंगसुब्वचनस्य च ६१।६२।६३॥१७॥ मात्रा ६४ बिंदुवि
॥सर्गाणां ६५।६६॥ न्यातकानां स्वरस्य च ६७ स्थानव्यंजनयोश्चापि च्युतदत्ताक्षरं ६९ तथा॥१८॥ द्वयो दत्ताक्ष
॥स्पष्टं पदविभागेन केवलेनैव यत् च वेल॥ विदुर्व्यस्तसमस्तं यत्समुदायेन पृच्छ्यते॥१९॥ प्रजायां किंपदं प्रोक्तं
॥मस्तानं कोविभक्तौ रः॥ का आयुधं तया स्यात् प्रलंबासुरविद्विषः॥२०॥ सुनासीर॥ ५॥ ५५॥ ५॥ ५॥

विविधं

जायामिति॥ कस्य नपुंसकस्य कमपि विदांसं सुनासीरदस्यैकस्मिन्नेव पदविभागेन पृच्छ्यति॥ प्रजायां किंपदं प्रोक्तमिति संबंध
ः पुरुषः पदविभागेन सुः इति प्रत्युत्तरं ददाति॥ सुशब्दस्याव्ययप्रजायां प्रजने सूवती॰ इत्यमरः॥ पुनः पृच्छति॥ अस्त्रेन सीना
म्यां रहितं उरो वक्षः कीदृगभवति॥ प्रत्युत्तरं॥ ना॥ पु[illegible]मान्॥ पुनः पृच्छति॥ प्रलंबासुरविद्विषो बलभद्रस्य आयुधं तया॥
आयुधस्याभावः आयुधता तया कः स्यात्॥ इति पृष्टे प्रत्युत्तरं सीरो हलं॥ हलः फालवहः सीरयोतिविक्रमादित्यः॥ बलभद्रः प्रवेदं भद्रस्यमप॥२०॥

8

व्यस्तप्रश्नस्य द्वितीयमुदाहरणमाह ॥ क इति ॥ दुःखेनाढ्यो दुराढ्यस्तस्य दुराढ्यस्य दुःखेनोदरपोषकस्य । मोहाय अज्ञानाय कः
इति पृष्टे । रामानुराग इत्यत्र कस्मिन्नपि पदविभागः । रामा । नुराग । इति । पदचतुष्टयं तत्र प्रथमप्रश्नस्योत्तरे । रा । वित्ते ।
रैन्ना द्रव्यमादृतिरूपं सौपरे । राः पुंसि स्वर्णवित्तयोरिति मेदिनिः ॥ पुनः पृच्छति ॥ मुरस्य नाम्नो दैत्यस्य विद्वेष्टुः मुरविद्विट्
मुरारिः द्विषो मुरारेः प्रिया का इति पृष्टे प्रश्नोत्तरं । मा । लक्ष्मीः । प्रश्नस्य वितर्के उतापो हो किं पदमिति पृष्टे प्रश्नोत्तरं । नु । चातुः २
इति । नु पृच्छायां विकल्पे च इत्यमरः । हत छदोऽधरः ओष्ठाधरौ तु रदनछदौ दशनवाससी इत्यमरः । हत छदस्याधरस्य
भूषणमलंकारः कः । इति पृष्टे प्रश्नोत्तरं । रागः । मलिनमाला विलोमे ॥ एवं प्रश्नचतुष्टयानां केवलैकपदविभागेन प्रश्नोत्तरं

॥ को दुराढ्यस्य मोहाय कः प्रिया मुरविद्विषः ॥ पदं प्रश्नवितर्के किं को हतच्छदभूषणं ॥ ७ ॥ रामानुरागः ॥ इति व्यस्त

॥ जातिः ॥ अपि सेविता द्विजिह्वैः कदापि के यान्ति न विकारं ॥ विघृष्यमानतनवः स्वगुणैरधिकं विराजन्ते ॥ ८ ॥ मलयतरवः ॥

इतमिति । एवमन्यत्रापि ज्ञेयं ॥ २७ ॥ इदानीं समस्तप्रश्नस्योदाहरणद्वयं द्वाभ्यामाह ॥ अपीति ॥ द्विजिह्वैः सर्पैः सेविता
अपि । कदापि कस्मिन्काले के विकारं विरूतिं न यान्ति ॥ न प्राप्नुवन्ति । या प्रापणे । कादृशाः । के । विघृष्यमानतनवः ।
छेदनमोटनघर्षणादिभिः विघृष्यमानतनुः शरीरं येषां ते तथापि स्वगुणैः सौरभ्यशैत्यादिभिरधिकं यथा
स्यात्तथा विराजन्ते दीप्यन्ते । राजृ दीप्तौ । द्विजिह्वौ सर्पसूचकाविप्यमरः । एवं पृष्टे प्रश्नोत्तरं । मलयतरवः । मल
याचलवृक्षाश्चन्दनानीत्यर्थः ॥ २२ ॥



अनिभृतेति पुंसां हृदयहारी चित्ताह्लादक: कोभवतीति प्रश्ने प्रसूनरं मधुरससमय: । मधुर्वसंत: तस्य रस: तन्मय: का
ल: । इत्येचैत्रचसंतेचमधु: पुंसि मधु तु मद्ये ति मेदिनि: । कीदृशो मधुसमय: अनिभृत कोकिल निस्वन मुखरित सहका
रकानन: । अनिभृता अविनीता: अधृष्टा ये कोकिला: पिकास्तेषां निस्वनैश्च शब्दैर्मुखरिता निमुखरीकृता निसह
काराणां अतिसौरभाणां आम्राणां काननानि यत्र स: । निभृत विनीत प्रश्रितास्समा इत्यमर: । सहकारो ति सौरभ इति
पुन: कीदृश: मधुकरझंकारकारकंकेलि: मधुकरै भ्रमरैर्हुंकारिणि: शब्दायमाना: कंकेलयो अशोकतरवो यत्र स: ।
॥ अनिभृत कोकिल निस्वन मुखरित सहकार कानन: पुंसां ॥ कोभवति हृदयहारी मधुकर झंकारकंकेलि: ॥ मधुरसमय: ५
॥ व्यस्त समस्त मथवा समास पद भंगत: ॥ द्वि: पठ्यते यत्र देवस्याद्द्विर्व्यस्तं द्वि: समस्तकं ॥२५॥ ५

कंकेलि: कुसुलोशोक इति हलायुध: । इति समस्त जाति: ॥२५॥ इदानीं द्विर्व्यस्त द्वि: समस्त जाते र्लक्षणमाह ॥ व्यस्तमिति ॥
समासस्य पदानि समासपदानि तेषां भंगो भेद: समासपदभंग: । भंगस्तरंगवद्भेदे जय विपर्यये इति विश्व: । तस्मात् समासपद भंग
त: । यत् व्यस्तं प्रागुक्त व्यस्त प्रश्नरीत्या द्वि: पठ्यते द्विवारं पठ्यते देव द्विर्व्यस्त संज्ञकं स्यात् । अथवा यत्समस्तं प्रागुक्त समस्त प्रश्नरीत्या स
मासपदभंगतो द्विवारं पठ्यते देव द्वि: समस्त संज्ञकं स्यादित्यर्थ: ॥ तदेतयोरुदाहरणद्वयं स्पष्टीकृतं कविना ॥ तद्यथा ॥ कापालि
पालिकमठ इत्यत्र कापालीचासौ कपालिकश्च कापालिकापालिकस्तस्य मठ: इति कर्मधारयषष्ठी तत्पुरुष व्यस्तप्रश्नरीत्या का
अपालि कमठ इत्येक: ॥ समासपदभंग: । पुन: कापालिकापालिकमठ इत्यपर: । समासपदभंगो द्वि: पठ्यत्वात् द्विर्व्यस्त संज्ञ उक्त: ।
एवं नवा रितं अवारितं इत्यत्र नञ् तत्पुरुषे अवारितोरणे इत्येक: समासपदभंग: । रणे अवारिते इत्यपर: । समासपदभंगो द्वि: प
ठत्वात् द्विर्व्यस्त संज्ञ: । एवं समस्त प्रश्नरीत्या । विवराजीन कुलीरा इत्यत्र विवरे शालीना कुलीराश्च इत्येक: । समासपदभंगो द्वि: । पुन:

विवरे शालीना: कुलीना यासु ता इत्यपर: समासपदभं

गो द्वि: रष्टवान् ॥ द्वि: समाससंज्ञ: प्रथम: । द्वितीयोदाहरणे पिकुवलयवनराजय इत्यत्र कुवलयवनलक्ष्मयवनलक्ष्म आ इत्येतेन: समास
पदभंग: । कुवलयानां वनानि कुवलयवनानि तेषां राजय: इत्यपर: समासभंगो द्विपदस्त्वाद्द्वि: समस्तसंज्ञ उक्त: ॥२४॥

५

काशिकापाठिकमठः।श्रीः २५

लयो द्विर्व्यस्तादिः समस्तप्रश्नयोस्तावद्द्विर्व्यस्तप्रश्नस्याद्यस्तुदाहरणमाह॥ वर्षास्विति। एकदा मेघागमं दृष्ट्वा पार्वती संकरंपृ
च्छ॥ वर्षासु प्रावृट्काले का भवतीति पृष्टे प्रत्युत्तरं। कालिका। मेघजालमित्यर्थः। मेघजालेपि कालिके इत्यमरः। निर्मधु
मधुरहितं अब्जं कमलं कीदृगिति पृष्टे प्रत्युत्तरे। ~~[illegible]~~ छतीति। अपालि। अपगता अलयो भ्र
मरा यस्मात् तत् अमरैरस्यकमित्यर्थः। कः एको मुख्यः वसुधासहितं पृथिवीयुक्तं शेषं नागविशेषं बिभर्ति धरतीति पृ
ष्टे प्रत्युत्तरं। कमठः। कूर्मः। तदेवोत्तरं पुनरपि पृच्छति। धरणीधरनाथस्य हिमवतः पुत्री मामंत्रयस्वभावाक्यरचेति
ष्टे प्रत्युत्तरं। कालि। हे हैमवती। का ईहे मवती ईश्वरीत्यमरः। अत्र लोके। अस्थिभिर्भस्मभिर्निचितानि व्याघ्रानि अंगा

वर्षासु का भवति निर्मधु कीदृगब्जं शेषं बिभर्ति वसुधासहितं च कः कः॥ आमंत्रय स्व धरणीधरनाथपुत्रीं कोत्रा
स्थिभस्मनिचितां गजनाम्नेय स्यात्॥२५॥ कीदृशो नरहमरस्थलं मतं हारि कुत्र सति भूषणमाभवेत्॥ इति कांतसुर
भः सकार्मुकः कीदृशो भवति कुत्र विद्विषां॥२६॥ ॥नियेषां तेता दृशाश्च तेन नाम्न्य अस्थिभस्मनि

चितां गजनास्तेषां मान्यः। कमठः छत्रादिनिलय इत्यमरः॥२५॥ द्विर्व्यस्तप्रश्नस्य द्वितीयोदाहरणमाह॥ कीदृशमिति।
कान्चननायिका स्वनायकं पृच्छति॥ हे कांत। मनोज्ञस्यामित्यमरः। उरस्थलं धन्वदेशं मतं स्मरमिति वदेति पृष्टे प्रत्युत्तरं। अवारि। नविद्य
ते वारि जलं यत्र ततः कष्टसाध्यजलमित्यर्थः। समानो मरुधन्वानाविसमरः। पुनः प्रश्नांतरं पृच्छति। द्वारि। गृहद्वारे। कुत्र सति
रस्मिन्विद्यमाने भूषणमलंकारो भवतीति पृष्टे प्रत्युत्तरं। तोरणं। आम्रादिपल्लवरचितविताने तोरणो बहिर्द्वारमिद्वारं रस्य
मरः। पुनरपि पृच्छति। सकार्मुकः। कार्मुकेन धनुषा सहितः सकार्मुकः सुभटो योधा विद्विषां शत्रूणां कुत्र कस्मिन् स्थले कीदृशो भवती
ति श्रीमांप्रतीति पृष्टे प्रत्युत्तरं। रणे अजनाशितः। संग्रामे वारयितुमशक्यः। भटा योधाश्च योद्धार इत्यमरः। अथास्त्रियां धेनुश्चा
वाधन्वसरासनकोदंडकार्मुकमित्यमरः। व्यस्तप्रश्नरीत्या द्विःपृष्टस्तोत्तरं व्यस्तस्योदाहरणद्वयमुक्तमित्यर्थः॥२६॥२७॥२८॥

~~[illegible]~~ः॥२६॥२७॥ इति द्विर्व्यस्तपद्यं २८

अवारितोरणे २६

जल्मि ४

६

11

इति द्विर्व्यस्तजातिः॥ इदानीं द्विःसमस्तप्रश्नस्याद्यमुदाहरणमाह॥ पक्षीति॥ पक्षिश्रेष्ठसखीबभ्रुसुरा कथं वाच्याः। पक्षिश्रेष्ठौ प्रसिद्धौ। सखी आली। बभ्रुर्नकुली। सुरा मदिरा। पक्ष्यादय इयः कथं वक्तव्या वदेति पृष्टे प्रत्युत्तरं। विवरालीनकुलीराः॥ विः पक्षी। वि विष्किर पतत्रय इत्यमरः। वरः श्रेष्ठः। आली सखी। आलिः सखी वयस्या चेत्यमरः। नकुली बभ्रुः। विपुले नकुले विष्णौ बभ्रुः स्यात् पिंगले त्रिष्वित्यमरः। इरा सुरा। इरा भूवाक्सुराप्सु स्यादित्यमरः। पुनरपि पृच्छति। ज्येष्ठमासि। शोषं शुष्कभावं गताः प्राप्ताः। अल्पमुर्वरितजलं यासु ताः अल्पजलाः भुवः भूम्यः कीदृश्यो वदेति पृष्टे प्रत्युत्तरं। तदेव विवरालीनकुलीराः इति। विवरेषु बिलेषु आलीनाः समंतान्निलीनाः कर्कटाः कुलीरा यासु ताः। स्यात्कुलीरः कर्कटक इत्यमरः॥२७॥ द्विःसमस्तस्यो-

पक्षिश्रेष्ठसखीबभ्रुसुरा वाच्याः कथं वद। ज्येष्ठमासि गताः शोषं कीदृश्योऽल्पजला भुवः॥२७॥ विवरालीनकुलीराः। विश्वं-
भराप्रलंबघ्नव्रीहिमानुषसंयताः। कथं वाच्या भवंत्येता दिनादौ विकसंति काः॥२८॥ कुवलयवनराजयः। द्विःसमस्तजातिः॥

दाहरणांतरमाह। विश्वंभरेति। कश्चन पुरुषः कंचिद्विद्वांसं पृच्छति। विश्वंभराप्रलंबघ्नव्रीहिमानुषसंयतः। विश्वंभरा पृथ्वी। रसा विश्वंभरा स्थिरेत्यमरः। प्रलंबघ्नो बलभद्रः। व्रीहिः अर्थाद्यवः। व्रीहिः सामान्यधान्येषु [illegible] धान्ये च पुंस्ययमिति मेदिनिः। मानुषो नरः। संयत् युद्धं च। स्त्रियः संयत्समित्याजिसमिद्युधः। एताः विश्वंभरादयः। कथं वाच्या भवंतीति पृष्टे प्रत्युत्तरं। कुवलयवनराजयः। कुश्च वलश्च यवश्च नरश्च आजिश्चेति द्वंद्वः। कुः पृथ्वी। वलः बलभद्रः। यवः स्थितमेवात्र विशेषः। [illegible] यवौ समावित्यमरः। नरो मानुषः। आजिः संयत् संग्राम इत्यावलिः। पुनरपि समस्तप्रश्नरीत्या पृच्छति। दिनस्यादिर्दिवसस्यादौ दिनादौ सूर्योदयकाले का विकसंतीति पृष्टे प्रत्युत्तरं पूर्वोक्तमेव। कुवलयवनराजय इति। कुवलयवनानि तेषां राजयः श्रेण्यः। स्यादुत्पलं कुवलयमित्यमरः॥ श्रेणी लेखास्तु राजयः॥२८॥ द्विःसमस्तप्रश्नजातिः॥ ५॥ ५॥ ५॥ ५॥ ५॥ ५॥ ५॥ ५॥

८

इदानीं व्यस्तसमस्तप्रश्नस्य लक्षणमाह ॥ दृष्टमिति ॥ यस्मिन्विरीत्या पूर्वं पदविभागेन दृष्टं पश्चात्समुदायेन दृष्टं भवेत् ॥ तत्तूभयार्थ
प्रदर्शनात् उभयोर्व्यस्तसमस्तप्रश्नयोरर्थप्रदर्शनं उभयार्थप्रदर्शनं तस्मात् व्यस्तसमस्तं व्यस्तसमस्तसंज्ञकं प्रश्नं विदुर्जानीयुः ॥
प्रश्नविद इति शेषः ॥ २५ ॥ व्यस्तसमस्तप्रश्नस्योदाहरणद्वयं प्रथममुदाहरणं तदाह ॥ केति ॥ कश्चन पुरुषः कमपि प्रश्नविदं पृच्छ
ति ॥ प्रियेण भर्त्रा रहिता विनाकृता का ॥ वरांगना सुंदरी ॥ धाम्नि गृहे ॥ केन ॥ तनयेन ॥ किंनाम्ना पुत्रेण नंदिता हर्षिता जातेति
पृष्टे प्रश्नकर्त्ताराह ॥ शकुंतला भरतेन ॥ शकुंतला नाम्नी राजपत्नी गृहे पितुर्गृहे भरतेन नाम्ना पुत्रेण नंदिता जातेत्यर्थः ॥
गृहदेहत्विट्प्रभावा धामानीत्यमरः ॥ व्यस्तप्रश्नरीत्या पृष्ट्वा पुनः समस्तप्रश्नरीत्या पृच्छति ॥ सदा सर्वस्मिन्काले ॥ कीदृशेन पुरु

[illegible] दृष्टं पदविभागेन समुदायेन यत्पुनः ॥ विदुर्व्यस्तसम
स्तं तदुभयार्थप्रदर्शनात् ॥ २५ ॥ का प्रियेण रहिता वरांगना धाम्नि केन तनयेन नंदिता ॥ कीदृशेन पुरुषेण पक्षिणां
बंधनं समभिलष्यते सदा ॥ २६ ॥ शकुंतला भरतेन ॥ ५ ॥ ॥ केन पक्षिणां शकुंतानां बंधनं समभिलष्यते वां
छ्यते इति पृष्टे प्रश्नकर्त्ता वदेत् ॥ शकुंतलाभरतेन ॥ शकुंतानां पक्षिणां लाभः प्राप्तिः ॥ शकुंतलाभस्तत्र रतेन तत्परेण ॥ बं
धकेनेत्यर्थः ॥ शकुंतिपक्षिशकुनिशकुंतशकुनद्विजा इत्यमरः ॥ २६ ॥ व्यस्तसमस्तप्रश्नस्योदाहरणमाह ॥ कीदृशमिति ॥ कश्च
न राजपुरुषः कमपि प्रश्नज्ञानं पृच्छति ॥ हे राजन् हृदयहारिकूजितं ॥ हृदयहारि ललितं कूजितं चेति कर्मधारयः ॥ मनोहारिकूजितं
कीदृशमिति पृष्टे प्रश्नकर्त्ता ॥ कलं ॥ अस्फुटमधुरध्वनिः ॥ ध्वनौ तु मधुरास्फुटे कल इत्यमरः ॥ व्यस्तरीत्या पुनः पृच्छति यशसि
कीर्तौ अमले ॥ यशः ॥ सत्यासुहृत्कः मतः सत इति पृष्टे ॥ प्रश्नकर्त्ता ॥ कविः पंडितः ॥ पुनः तव भयाकुलः ॥ कथंचिद्विभीतः भया
कुलः ॥ भयविह्वलः ॥ विपिने कानने कोकिलकीवसतीति पृष्टे प्रश्नकर्त्ता ॥ अहितः शत्रुः ॥ छिद्रिपक्षाहिता भवत्र इस्सुग

८

13

नवरात्रपदस्यमरः ।। व्यस्तरीत्या वारत्रयं पृष्ट्वेदानीं समस्तप्रश्नरीत्या पृच्छति । चः पुनरर्थे । कीदृशो नितरां कलंकेन हीनो भवेदेवेति
पृष्टे प्रत्युत्तरं । कलंकविरहितः । कलंको लांछनं तेन विरहितः विधुश्चन्द्रमा भवेदेव ।। २१ ।। व्यस्तसमस्तजातिः । इदानीं द्विर्व्यस्त
समस्तप्रश्नस्य लक्षणमाह ।। द्विर्व्यस्तमिति । यत्र द्विर्व्यस्तं वारद्वयं व्यस्तप्रश्नरीत्या पृष्टे । पश्चात् । यत्समुदायेनैवेक
चेनाकेवारं समस्तप्रश्नरीत्या पृष्टं भवेत् ।। एवं त्रिधाभिन्नं वारत्रयं पृष्टरूपं पृष्टं लेदैः प्रश्नं द्विर्व्यस्तकसमस्तकं संज्ञं प्रश्न
मुक्तं प्रश्नविभिन्नलिङ्गेषु ।। २२ ।। तावदेतस्याः उदाहरणमाह ।। काविति । केन भवेन पृच्छति । शंकरस्य शिवस्य वलयौ कौ इति
पृष्टे प्रत्युत्तरं । अहीसर्पौ वलयः प्रकोष्ठाभरणं कटकं वलयो स्त्रियामित्यमरः ।। पुनः पदविभागेन पृच्छति । अपयोधरः पयोध

कीदृशं हृदयहारि कूजितं कः सखा यत्रास्ति भूपतेर्मलः ।। कस्तवास्ति विपिने भयाकुलः कीदृशश्च न भवेन्निशाकरः ।
।।२५।। कलंकविरहितः ।। इति व्यस्तसमस्तप्रश्नजातिः ।। द्विर्व्यस्तमेव यत्पृष्टं समुदायेन यद्भवेत् ।। त्रिधाभिन्नं तदेवोक्तं
द्विर्व्यस्तं समस्तकम् ।।२३।। कौ शंकरस्य वलयावपयोधरः कः कीदृक् परस्य नियतं वशमेति भूपः ।। संबोधयोरग
पतिं किं जईच कीदृग्दुर्योधनो न हि भवेद्दृढ कीदृक्चात्म्य ।।२४।। अहीनाहतनयः ।।५।।५।।५।।५।।५।।५।।

ररहितः कः इति पृष्टे प्रत्युत्तरं ना ।। पुनः पृच्छति । नियतं निश्चितं । कीदृक् भूपः परस्य राज्ञो वशं प्रधानतायै ति गच्छति
प्रत्युत्तरं । हतनयः । हतः प्रतिहतो नयो नीतिर्यस्य सः । नीतिरहित इत्यर्थः ।। द्वितीयवारं पुनः पृच्छति । उरगपतीं । उरगराजा
नं संबोधयेति पृष्टे प्रत्युत्तरं । अहीनासर्पाणां इनः प्रभुस्तत्संबुद्धौ हे अहीन । सर्पस्वामिन् ।। च पुनः विजयी कीदृक् इति पृष्टे
उत्तरं । अहतनयः । न हतनयः अहतनयः नीतिमानित्यर्थः ।। च पुनः समुदायेन पृच्छति । हीत्यवधारणे । दुर्योधनो धन
राष्ट्र [illegible] च पुनः कीदृक् न भवेदेवेति पदत्रयाहीतिपृष्टे उत्तरं । अहीनाहतनयः । अहिनाहतः । हीनाहः । नहीनाहः । अहीनाहः

यद्येत्र सखा पुत्रः तस्य तनयः पुत्रो न भवेदेव ।।२३।।

८ वि॰मु॰मं॰



व्यस्तसमस्तप्रश्नस्योदाहरणांतरमाह ॥ क इति ॥ दुरीश्वरस्य दुःखेन ईश्वरः दुरीश्वरो दरिद्रस्तस्य मोहाय अज्ञानाय को विहि
तः कः प्रोक्त इति पृष्टे प्रश्नोत्तरे ॥ स ॥ वित्तं पुनः पृच्छति गुरुः पित्रादिः कथं संबोधनीय इति पृष्टे प्रश्नोत्तरे ॥ जीव ॥ हे जीवेति वि
चस्त ॥ मध्ये दृष्टा भाषा संबुद्धौ रामजी विघ्नजीविन्यातैः ॥ पुनः पृच्छति ॥ कलौ कलियुगे ॥ धात्र्यां पृथिव्यां विरलः कः ॥ प्रश्नो
त्तरे ॥ सन् सुधीः ज्ञो विद्वो बुध इत्यमरः ॥ पुनः पृच्छति ॥ नवघनः नूतनमेघः किं वदन् ॥ किमिवेति विलूतन ॥ इति पृष्टे प्रश्नोत्तरे ॥ इ
भवन् ॥ इभः कुंजरः ॥ नदन् ॥ स्वामस्य सर्थः ॥ कीदृक् पुरुषो द्विजो न भवति ॥ प्रश्नोत्तरे ॥ अनः अग्निहोत्रः ॥ अकारो वासुदेवस्याग्नि

कोमोहाय दुरीश्वरस्य विहितः संबोधनीयो गुरुः को धात्र्यां विरलः कुलीनवघनः किं न व कीदृग्द्विजः ॥
किं रेखा वचनं भवेद् इति सोयं दुःखाय कीदृक् खले कोविद्याधिपतिर्मनोभवसमो मस्याभवन् कीदृशः ॥ २४ ॥
राजीवसन्निभवदनः ॥ द्वियस्तसमस्तजातिः ॥ १६ ॥ ॥ इत्यमरः ॥ तस्मात् इन्यो भनः अविभुक्तसणोनभव

सेव ॥ श्रामणो नामकीलनूपरिति विषमुके ॥ अन् स्वरे इति सूत्रेण नयो ॥ नारेरा ॥ अन्याद्न्योभनभ्व इति वत् ॥ पुनः पृच्छति ॥ ले
खानवनं रेखा वा विदिषावलीति पृष्टे ॥ प्रश्नोत्तरे ॥ राजी ॥ ॥ लेखा श्रेणी लेखा तु राजय इत्यमरः ॥ पुनः पृच्छति ॥ कीदृक् खलः ॥
अतिनायं दुःखाय ॥ एव ॥ प्रश्नोत्तरे ॥ वसन् ॥ निकटे निवसन् पुनः पृच्छति विद्याधिपतिर्गणपतिः कः प्रश्नोत्तरे ॥ इभवदनः गजमु
ख ॥ पुनः पृच्छति ॥ मस्य शरीरेण मनोभवसमः कामसदृशो भवन् ॥ कीदृशः प्रश्नोत्तरे ॥ राजीवसन्निभवदनः ॥ राजीवे
न कमलेन सन्निभं तुल्यं वदनं यस्य सः ॥ २४ ॥ द्विःसमस्तजातिः ॥ १७ ॥ १८ ॥ १६ ॥ १७ ॥ १६ ॥ १८ ॥ १६ ॥ १८ ॥ १९ ॥

म॰स॰ ८

15



इदानीं द्विःसमस्तव्यस्तप्रश्नस्य लक्षणमाह ॥ यत्र पदं द्विः समस्तं वारद्वयं समस्तप्रश्नरीत्या पृष्टं पुनरेकवारं व्यस्त
प्रश्नरीत्या पृष्टं भवेत् ॥ तत् द्विःसमस्तकव्यस्तं संज्ञप्रश्नं पण्डितैः कथितमित्यर्थः ॥ २४ ॥ अस्य तावदुदाहरणमाह ॥
कीदृक्षः इति ॥ शोभनो राजा सुराजा तस्य सुराज्ञः ॥ सकलजनः समस्तप्रजालोकः कीदृक् शोभते इति पृष्टे प्रत्युत्तरं ॥
विधुरविरहितः ॥ विधुरेण विश्लेषदुःखेन विरहितो हीनः ॥ विधुरं तु प्रविश्लेषे इत्यमरः ॥ इह लोके कः कालः

द्विःसमस्तं यत्र पृष्टं व्यस्तकेन पुनर्भवेत् ॥ तद् द्विःसमस्तकं व्यस्तं कथितं प्रश्नपण्डितैः ॥ २५ ॥ कीदृक्षः सकल
जनो भवेत्सुराज्ञः कः कालो विदित इहांधकारहेतुः ॥ कः प्रेयान् कुमुदवनस्य को निहंति प्रालेयं च दि
नीरसाजितस्य याचः ॥ २६ ॥ विधुरविरहितः ॥ ५ । ७ । ५ ॥ ५ ॥ ५ ॥ ७ ॥ ५ । ७ । ५ ॥ ५ ॥ ५ ॥ ५ ॥

अंधकारस्य तमसो हेतुः कारणं विदितः प्रसिद्धः ॥ प्रत्युत्तरं दोषा ॥ विधुरविरहित इति ॥ विधुश्चंद्रः रविः
सूर्यस्ताभ्यां रहितः ॥ कुमुदवनस्य प्रेयान् श्रेष्ठः कः प्रत्युत्तरं विधुश्चंद्रः ॥ आतप्यं दुःखिनां विरसानां को निहंति वदे
ति पृष्टे प्रत्युत्तरं ॥ अभ्रः मेघः ॥ अवश्यायः तौल मेघाको इत्यमरः ॥ आतप्यो आतपज द्विषा इत्यमरः ॥ पुनः पृच्छति ॥ त्व
याचः जित इति पृष्टे प्रत्युत्तरं ॥ आहतः शत्रुरित्यर्थः ॥ २६ ॥ रामराम ॥ ७ । ५ ॥ ६ ॥ ७ ॥ ५ ॥ ५ ॥ ५ ॥ ६ ॥

१

वि॰मु॰मं॰

द्विःसमस्तव्यस्तप्रश्नस्य द्वितीयमुदाहरणमाह ॥ संग्राम इति ॥ कश्चन पुरुषः कमपि स्वजनं संपृच्छति ॥ स्फुरन्नूपो ऽसि-
रक्तीयस्य स्फुरदसिलेन स्फुरद्दासिना खड्गेन ॥ संग्रामे युद्धे के हता इति पृष्टे प्रत्युत्तरं ॥ नरकरेणवः ॥ पिशङ्ग स्तोव इति ॥
तेन पौरुषपरकरेणवः हस्तिनः करेणुरिभ्यां स्त्रीनेभे इत्यमरः ॥ पुनः पृच्छति ॥ वनेतेति स्वे दे ॥ निरये नरके ॥ नरस्य पुरु-
षस्य दुःखं पीडां के कुर्युः इति इति पृष्टे प्रत्युत्तरं ददेव ॥ नरकरेणवः ॥ नरकस्य नरस्य भूमेः रेणवः पांसवः ॥ रेणुर्द्वयोः
स्त्रियां धूलिः पांसुर्ना न द्वयोः रजः इत्यमरः ॥ पुनः पृच्छति ॥ कदापि कस्मिन्नपि काले कस्मिन्नंगे लोम न तनुरुहं नैव भवौ

संग्रामे स्फुरदसिना हताः स्युः के के दुःखं बत निरये नरस्य कुर्युः ॥ कस्मिन्नु भवति कदापि नैव लोम मर्त्यानां केऽज
गति महालघुत्वभाजः ॥ ३७ ॥ नरकरेणवः ॥ द्विःसमस्तव्यस्तजातिः ॥ एकं तु तावचो यत्र भिन्नार्थप्रति
पादकं ॥ प्रश्ने द्विःसमस्तस्य तमेकालापकं विदुः ॥ ३८ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

नैवोत्पद्यते इति पृष्टे प्रत्युत्तरं ॥ नरकरे ॥ नरस्य पुरुषस्य करे हस्ते ॥ नरक्तं लोम नरोमेत्यमरः ॥ पुनः पृच्छति ॥ जगति सं-
सारे महालघुत्वभाजः ॥ महालघो भावो महालघुत्वं भजन्तीति महालघुत्वभाजः के स्युः इति पृष्टे प्रत्युत्तरं रेणवः
॥ परमाणव इत्यर्थः ॥ स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणव इत्यमरः ॥ ३७ ॥ द्विःसमस्तव्यस्तजातिः ॥ यत्र यस्मिन्
प्रश्ने एकं तु तावत् एकमेव कान्तरेण भिन्नार्थप्रतिपादकं वचः द्विःसमस्तस्य प्रश्ने इदं तं प्रश्नं एकालापकसंज्ञं विदुः जानीयुः ॥

मु॰स॰

१ विदग्धमुखमंडनटीका ॥ २ ॥

17

अथोदाहरणं द्वयश्लोकाभ्यामाह ॥ कीदृशीति। परमपापकर्मभिः अत्यंतपापनिष्ठैः पुरुषैः। अनेकधा अनेकप्रकारं। की
दृशी निरयभूः नरकभूमिः सेव्यते। प्रश्नांतरं। नरकपालरचिता। नरकाणां पाला रक्षका नरकपालास्तैः रचिता कृता। चे
ति पुनः प्रेतराक्षसपिशाचैः इत्येतैर्निर्विशेषैः सेविता पितृकाननस्थली। प्रेतारण्यभूमिः कीदृशीति पृष्टे प्रश्नांतरं।
नरकपालरचिता। नराणां कपालैः रचिता विरचिता इत्यर्थः ॥ ३९ ॥ केसरेति। केसरो बकुलद्रुमस्तस्य तलेषु अधस्ता
त्संस्थितो मत्तकुंजरः कीदृशो भवति। प्रश्नांतरं। दानवकुलभ्रमरहितः। दानेन मदेन बकुलद्रुमस्याधो भ्रमरा

कीदृशी निरयभूरनेकधा सेव्यते परमपापकर्मभिः ॥ प्रेतराक्षसपिशाचसेविता कीदृशी च पितृकाननस्थली ३९ ॥
नरकपालरचिता ॥ केसरद्रुमतलेषु संस्थितः कीदृशो भवति मत्तकुंजरः ॥ तत्त्वतः शिवभवेश्यलक्षणैरर्जुनः
समितिकीदृशो भवेत् ॥ ४० ॥ दानवकुलभ्रमरहितः ॥ ५ ॥ ६ ॥ ५ ॥ ७ ॥ ८ ॥ ७ ॥ ५ ॥ ५ ॥

णां हितः प्रियः ॥ पुनः पृच्छति। समितिसंग्रामे तत्त्वतः इदमित्यं ज्ञानेन लक्षणैस्तच्चिन्हैः शिवं चांकरं वेवेश्य
ज्ञाता अर्जुनः सव्यसाची कीदृशो भवेदिति पृष्टे प्रश्नांतरं ॥ दानवकुलभ्रमरहितः। दानवानां दैत्यानां कुलेऽन्व
येऽभ्रमः स्तेन रहितः ॥ ४० ॥ इत्येकालापजातिः ॥ प्रभिन्नकप्रश्नस्य लक्षणमाह ॥ शब्दार्थेति। यत्र भिन्नं व्यस्तैः पृ
थग्विभागैः रुत्ता प्रभिन्नं भवति पृथक् प्रश्नं स्यात् ॥ यत्तु। समस्तकैः समस्तप्रश्नरीत्या प्रभिन्नं स्यात्। कीदृशैः
व्यस्तैः। शब्दार्थलिंगवचनैः। शब्दार्थश्च लिंगवचनं च। शब्दार्थलिंगवचनानि तैः शब्दार्थलिंगवचनैः। कस्मि

४

वि॰मुं॰मं॰

म॰प्र॰

न्तर्भेदेनार्थ्यर्थस्तस्येत्याप्रभिन्नं। कुत्रचिदेकार्थसमस्तारीसाप्रभिन्नं। कुत्रचिल्लिंगभेदेनप्राभिन्नं। कुत्रचिद्वचनभेदेन
प्रभिन्नं। कुत्रचिच्छब्दार्थलिंगाभ्यांप्रभिन्नं। कुत्रचिच्छब्दार्थलिंगवचनैः प्रभिन्नं। कुत्रचिद्विभक्तिभेदेन प्रभिन्नं यत्तत्प्र
भिन्नसंज्ञंप्रश्नमुच्यतेइत्यर्थः॥ एवंसप्तभेदाः प्रभिन्नकप्रश्नेभवंति॥ शब्दार्थभेदोयथा॥ देवोमेघेसुरेराज्ञीसेनेः
दिवशब्दोमेघवाचीसुरवाचीराजवाचीच॥ लिंगभेदोयथा॥ तपस्युत्कांतोनिघ्नघनाघ्नपुल्लिंगः॥ तपःसांगंतपो
वाचीनपुंसकं॥ वचनभेदोयथा॥ नरइतिप्रथमैकवचनं॥ नराइत्यस्यप्रथमाबहुवचनंचानानरोनरः॥ इतिविभ
क्तिभेदोयथा॥ मासइतिरूपंप्रथमापंचमीषष्ठीविभक्तिषुभवति॥ ४१॥ इतिप्रभिन्नकप्रश्नलक्षणं॥ शब्दार्थलिंग
शब्दार्थलिंगवचनैर्व्यस्तैर्यद्वासमस्तकैः॥ विभक्त्याचप्रभिन्नंयत्तत्प्रभिन्नकमुच्यते॥ ४१॥ निर्जितसकलारातिः
भरि पृच्छतिकोनेकोत्सोयमच्छलिमेघात्ययरुतरुचिरराज्ञायाक्षितिभिरक्ष्यकारिनिशायाः ४२ विधुतारातेजः॥
भिन्नस्योदाहरणद्वयंश्लोकाभ्यामाह॥ निर्जितेति॥ निर्जिताः सकलाः समस्ताअरातयः शत्रवोयेनसः निर्जित
सकलारातिः पृच्छतीति॥ कः एकोमत्स्योः सकलानयंनगच्छतिनप्राप्नोति। प्रभूतरं॥ विधुतारातेजः हे विधुत
रातेनिर्जिताकात्रोऽजः शिवः पुंल्लिंगः॥ अजविहरणाग॥ इत्यमरः॥ पुनः पृच्छति॥ निशायाराज्ञेतिभिरक्षय
कारि॥ अथकारापत्तरिक्षिमितिपृष्टेप्रस्तुतराज्ञाशब्दार्थलिंगभेदेनाह॥ विधुतारातेजः॥ विधोश्चंद्रस्यतारा
णांनक्षत्राणांचतेजः नपुंसकलिंगं॥ कीदृश्याः निशायाः मेघात्ययेन। मेघापगमवर्द्धनरुचिरानिर्मलाआत्राणादिव्यस्याः सा

मघात्तस्याः॥४२॥

४

19

विहगेति। विहगपतिः पक्षिराजो गरुडः कं अहितं शत्रुं हतवान् । प्रसूत्तरं । अहिं सर्पं । जनैः मनुष्यैः सहितं पुरं नग
रं कीदृग्भवति प्रसूत्तरं । बलिरहितं । बलिहस्तांशवः करा इत्यमरः । हे धीमन् बुद्धिमन् विदितं कठिनं किं । प्रसू
त्तरं । अयः लोहं नपुंसकं । यादष्पतिरपि समुद्रोऽपि कीदृग्भयरुत् भवेति वद । प्रसूत्तरं । अहिमकरमयः । सपुमि
क्रूरग्रहास्ते मेषः प्रकुरः पूर्ण इत्यर्थः । शब्दार्थलिंगभिन्नप्रश्नं । शब्दार्थविभक्तिभिन्नस्योदाहरणं द्वयं श्लो
काभ्यामाह । अनुकूलेति । अनुकूलविधायी मनोगतं संपादको दैवतं दैवो यस्य सः । एवं विधोऽन्यो राजा की

विहगपतिः कं हतवानहितं कीदृग्भवति पुरं जनसहितं । किं कठिनं विदितं वद धीमन् यादष्पतिरपि
कीदृग्भयरुत् ॥४३॥ अहिमकरमयः ॥ शब्दार्थलिंगभिन्नप्रश्नः ॥ अनुकूलविधायि दैवतो विजयी
स्यान्ननु कीदृशो नृपः ॥ विरहिण्यपि जानकी वने निवसंती सुदृशी कुतः ॥४४॥ कुशलवच्छ्रितो ॥४५॥

दृशो विजयी जयशीलः स्यात् । प्रसूत्तरं । कुशलवच्छ्रितः । कुशलेन क्षेमेण वर्द्धितः । आमरूढः कुशलं क्षेममस्त्रि
यामित्यमरः ॥ प्रथमा विभक्तिः ॥ विरहिण्यपि जानकी सीता वने निवसंती कुतः । कस्मात्सु हर्षभाक् इत्यो प्र
श्नाप्रसूत्तरं ॥ कुशलवच्छ्रितः । कुशाख्यलवाख्यकुशलवौ पुत्रौ तयोः ऋद्धिः संपत् ऋद्धिसत्तस्मात् । पंचमी विभ
क्तिः ॥४६॥ कुसुममिति । नाकतः स्वर्गात् कुसुमं पुष्पं पततूपतमानं एत्य प्राप्य भोगिनः सुखिनः कृतेस्पृ
हयंती । वांछां कुर्वंति । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः ॥ प्रसूत्तरं । सुरतरवे । कल्पवृक्षा

नुरतिचितर्द्धैः सुशिक्षिताः वरांगनाच्चतुरा स्त्री रतं मैथुनमगम्यकं मत्वं कुरुते। प्रस्तुतरं। सुरतरवे। सुरतस्य मैथुनस्य
रवे शब्दे ॥४५॥ राजार्थविभक्तिभिन्नं ॥ राजार्थवचनामे अस्याघमुत्तहरेण माहयकामिति। कृष्णन पृच्छति। हरिर्विष्णुः।
अंबुधिमध्यमग्नाः ॥ समुद्रमध्ये निलिनां का उज्जहार सुधर्मानितवान्। प्रस्तुतरं। कुं। पृथिवी। आगमानां वेदानां
कीदृक् सुतं श्रवणं। निर्मलपापापहं भवति। प्रस्तुत्तरं पदमपूर्वं। इमइन्द्रियनिग्रहस्तं करोति। स्त्रियावराविदग्ध
कुसुमं पत्रं इत्यनाकतो वदरुकस्मै स्पृहयति भोगिनः ॥ अधिगम्य रतं वरांगना कुतुयत्नं कुरुते सुशिक्षि
ता ॥४५॥ सु[redacted] ॥ सुरतरवे ॥ राजार्थविभक्तिभिन्नं ॥ कासमुज्जहार हरिरंबुधिमध्यमग्नां कीदृ
क्सुतं भवति निर्मलमागमानां ॥ आमंत्रयस्व वनमग्निशिखावलीढं तत्रापि को दहति के मदयंति भृंगान् ॥४६॥ कुंदमकरंदबिंदवः ॥
तिसधाधामः स्वाध्यायमत्स्यं दुआगम इति हलायुधः ॥ पुनः पृच्छति ॥ अग्निशिखावलीढं अग्निज्वालया ले
लिह्यमानं दह्यमानमिति यावत् ॥ वनं कानं आमंत्रयस्वेति पृष्टे प्रत्युत्तरं। दुवित। दवो वनाग्निः सोऽस्मिन
स्तीति दवी ॥ तत्संबुध्यौ हे दवि ॥ च पुनरर्थे ॥ तदूनमपि को दहति। प्रत्युत्तरं। दवः वनाग्निः। दमुदायो वना
रण्यवन्हीयमपरः ॥ पुनः पृच्छति ॥ भृंगानुभ्रमरान् के मदयंति। मत्तान् कुर्वंति। प्रत्युत्तरं। पुनः सर्वं। कुंदमक
रंदबिंदवः ॥ कुंदस्य कुंदनाम्नः पुष्पविशेषस्य यो मकरंदः पुष्परसस्य बिंदवः विप्रुषः ॥४६॥४७॥४८॥

स्प

दुदाहरणांतरमाह॥ वसतीति॥ कश्चन पृच्छति। सरोरुहाणां कमलानां संततिः कुलं कुत्र वसतीति पृष्टे प्रत्युत्तरं। केज
ले। कोशाशोजलमास्यालमिलिएका स्मरः। तत्र निश्चितं। दिनस्तो दिवाकरस्य। तिमिरद्विडिः अंधकारहारिणः कै
भवतीति पृष्टे। प्रत्युत्तरं। किरणोत्करैः। रश्मिसमूहैः। पुनः पृच्छति। पवनभक्षाः सर्पाः। तेषां सपत्नो रिपुर्मयूरः
स कैरणे पुच्छे मस्तुकमुत्कंठितं पुरूपं आस्यस्येति पृष्टे प्रत्युत्तरं। केकिरणोत्करैः मयूरस्य रणे उत्कंठितः। है
केकिरणोत्करैः। शिखावलैः शिखीकेकीत्यमरः॥ जगति लोके प्रियः कः इति पृष्टे प्रत्युत्तरं। राः अर्थाः। अर्थैः रैर्वि

वसति कुत्र सरोरुहसंततिर्दिनकृतो ननु केतिमिरद्विषः॥ पवनभक्षसपत्नरणोत्सुकं पुरुषमाश्रयमोज
गति प्रियः॥ ८७॥ केकिरणोत्करैः॥ शब्दार्थवचनभिन्नं। कीदृग्गृहं याम्यमन्तकस्य कः स्थानमभस्त
रणे जनानां॥ भूषानते कंठकेथं नु पृष्टे मुक्ताकलापैरिति चोत्तरं किं॥ ८८॥ हाराविनावः॥ ५॥ ५॥

भवा अपीत्यमरः। किरणोत्करा इति प्रथमाबहुवचनं। पश्चाद्रैः शब्दस्य रा इति प्रथमैकवचनमुक्तं। शब्दार्थ
वस्तु सर्वं प्रपंच एव। तस्मात् हेतोः प्रश्नं च शब्दार्थवचनभिन्नसंज्ञकं॥ ८०॥ शब्दार्थवचनभिन्नसंज्ञकमाश्रयावि
जानीहि। ताभिन्नस्याप्युदाहरणमाह॥ कीदृगिति। यमस्येदं याम्यं। याम्यं चतत् गृहं च याम्यगृहं। कश्चन पु
च्छः पृच्छति याम्यगृहगतस्य पुंसः गृहं जयां चरकस्य अनंकीदृगिति पृष्टे प्रत्युत्तरं। हारा वि। हा युत्कैः विषाद
नरो केनपीड्या यात्युक्तो रावः शब्दो येन। तत्र हाविरं मुगति प्रियमरः। अंभसां जलानां तरणे परपारगमने
का। त्राणं तारणमिति पृष्टे प्रत्युत्तरं। नावः। नौर्नो इत्यर्थः। तु इति पृष्टे तेः पुनरर्थो। हे कुठागल। तत्र वक्ष्याध्वे
लंक्रिया कथं नस्युः कालकलापैर्मुक्ताहारैः इति प्रश्नो नाम प्रकारेण पृष्टे सति कंठः प्रत्युत्तरं वदति। हाराविनावः। हे हार:

वः पुष्पान् विना कंठस्यालंक्रिया नास्ति। नाव इति स्त्रीलिंगः।
प्रथमाबहुवचनं चारः इति सुप्प्रत्ययद्वितीयाबहुवचनं नावो रात्र
शब्दार्थविभक्तिभेदोलिंगभेदेस्वोत्कं॥ ८८॥

१२

वि॰मु॰मं॰

शब्दार्थविभक्तिलिंगाभिन्नस्या द्वितीयमुदाहरणमाह ॥ कवय इति । कवयः पंडिताः । कुत्र कस्मिन्विषये कीदृ
शा भवंति । न देति हेमलूनतरं गिरिसारमुखाः । गिरिशवाण्यां सारं वदन्तीति यावत् । मुखं येषां ते गिरिसा
रमुखाः । यावद्भा इत्यर्थः । सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्विस्यमरः ॥ सारमुखा इति मकुन्यं तपाठे सा
रं मुखं स्यति सारमुखः । मुखस्ले ये । इगुपधज्ञाप्रीकिरः कः ॥ समंतात् ॥ विहितं प्रसिद्धं स्वं कठिनं । कठोरमिति प
हेमलूनतरं । गिरिसारे लोहेऽप्ययः । लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिंडं कालायसायसी ॥ अश्मसार इत्यम

कवयो बभूवुः कुत्र कीदृशाः कठिनं छिद्रितं समं ततः ॥ अधुना नववैरियोषितां हृदि तापः प्र
गिरिसारमुखाः ॥ शब्दार्थविभक्तिलिंगाभिन्नाः ॥ ५ ॥ ६ ॥ ५ ॥ ५ ॥
बलो विहाय कः ॥ ८१ ॥ ५ ॥

रः ॥ पुनः पृच्छति । अधुना नववैरियोषितां शत्रुस्त्रीणां हृदये कः विहाय तापः । संज्वरः प्रबल इति वचे
प्रकृतरं मुखाः स्थालीः रं धनपात्राणीति यावत् । पिठरः स्यात्स्थली कुंभमित्यमरः ॥ उषा इति पाठे । उषारा
त्रिसोऽतवा । उषा रात्रौ तरं तस्यान्यत्राव्ययमप्युषेति विश्वः ॥ प्रायो रात्रौ रात्रेश्वरभयामेवापरस्य चत्र
मपाभावस्तस्यान्न स्विन्नाले वैरियोषितः मुखं स्वपतीति सूचितं । सारमुखा इति पुंल्लिंगे गोप्रथ
मा विभक्तिः उषास्वा इति स्त्रीलिंगो द्वितीया विभक्तिः ॥ ८१ ॥ शब्दार्थविभक्तिलिंगभिन्नं ॥

मं॰टी॰

१२

23

शब्दार्थविभक्तिलिंगभिन्नं ॥ शब्दार्थवचनलिंगभिन्नस्योदाहरणद्वयं श्लोकाभ्यामाह ॥ मेघात्ययमिति । मेघात्यये
शरत्काले सुभगावगाहं । शोभनस्नानं नदीलक्ष्मिं भवति । प्रत्युत्तरं । सरसी । कासारः सरसी सरस्यमरः ॥ चेसव
चारणै । चारणाश्च मल्लाश्च वेश्याश्च चारणमल्लवेश्यास्ताः । का वा विडंबयति । अयमर्थं का विडंबयति । प्रत्युत्तरं ।
जरासाधादवस्यं । दुर्वारवीर्यविभवस्य रणे कः भवेत् प्रत्युत्तरं जयः विजयः । तरणिप्रभाभिः । सूर्यकिरणैः । स्मेरवक्त्रे
णस । स्मितमुखेन सुभगाः शोभनाः काः । प्रत्युत्तरं । सरोजराजयः ॥ कमलश्रेण्य इत्यर्थः ॥ ५० ॥ घनेति ॥

शब्दार्थविभक्तिलिंगभिन्नं ॥ मेघात्यये भवति किं सुभगावगाहं का वा विडंबयति चारणमल्लवेश्याः । दुर्वा
रवीर्यविभवस्य भवेद्रणे कः काः स्मेरवक्त्रसुभगास्तरणिप्रभाभिः ॥ ५० ॥ सरोजराजयः । घनेति शिरोरुहा
मधुमथनं मधुमथनस्तं शिरोरुहं च ॥ कः खलु चपलतयासु विविद्धितः काननुधानतया विगद्दिता ॥ ५१ ॥ केशवनौकाः ।

शिरोरुहः केशाः । मधुमथनं केशवं पश्यति पुनः मधुमथनस्तं शिरोरुहं पश्यति । किं पश्यतीत्याह ॥ चपलस्य
भावश्चापलं तया चपलतयासु विपक्षिव्यांकूः । विद्विताः स्यालः लवं शिरोरुहे गपरे । मधुमथनः प्र
तिवदति । हे केशा शिरोरुहवनौकाः । वनेऽओकः स्थानं यस्य स । वानर इत्यर्थः ॥ न चितिपश्नेग विजलेमालवा
पुजालेषु गौरीति नानार्थः ॥ यानस्याभावो यानतातया यानतया । कागेद्दिता उक्ता । एवं मधुमथनेन प्र
श्नः । शिरोरुहो वदति ॥ हे केशव कः नौकाः नावः ॥ ५१ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

१३
वि॰मु॰मं॰

भाद्यर्थवचनालिंगभिन्नं। शब्दार्थवचनविभक्तिभिन्नस्यायमुदाहरणं यथा॥ न भवतीति। कश्च न पृच्छति। कीदृशी
भूः। भूमिः। मलयस्य मलयनाम्नः शैलस्य न भवतीति पृष्टे प्रत्युत्तरं। विपन्नागा। विगताः पन्नगाः सर्पाः यस्याः सा। स
र्परहिता मलयाचलभूमिर्न भवत्येव। पुनः पृच्छति। इह लोके कः कुचेरुणाननाविभक्तिं न धरति। प्रत्युत्तरं। ना। पु
मान्। पुनः पृच्छति। श्रीः लक्ष्मीः कं गता। कं पुरुषं आश्रितेति पृष्टे प्रत्युत्तरं। अं विष्णुं। अकारो वासुदेवस्यादित्येकाक्षरं।
पुनरपि पृच्छति। भवद्भिर्निवहैर्भवता वानुवर्गेषु नित्यं सततं प्राप्ता। प्रत्युत्तरं। विपत्। विपत्तिः। पुनः पृच्छति।

न न भवति मलयस्य कीदृशी भूः कः कुचं न विभक्तिं गता श्रीः॥ भवद्भिर्निवहेषु कालिनि संततमथ
नेन विपक्षघातिनां॥५१॥ विपन्नागा ना॥ समयमिह वदति कं निशीथं रामयति को न्कुरुवाहिताह्वयं द्वं॥
वितरति जगतां मनः सुखीद्भुद्भमतिमात्रमयं स दातु जगः॥५२॥ अरविंदमा। अत्राकार्थवचनभिन्नं॥

वलमथनेन। वलं असुरं मथ्नातीति वलमथनः शक्रस्तेन केषां विपक्षाधिपतिः। व्यधायि कृता। प्रत्युत्तरं। नगानां गो
त्राणां। तरः शैलो। नगा वगाद्रियमरः॥५०॥ अस्यैवोदाहरणांतरमाह॥ समयमिति॥ इह लोके। कं समयं। कं
कालं निशीथं न कंपयति। विद्वांसः इति शेषः। इति पृष्टे प्रत्युत्तरं। अरविंदानि विघते रविः सूर्यो यस्मिन् स अरवि
ह्ना। न कं निशीथो रजनी रात्रिः। विभावरी तिलारकात्यं दः॥ पुनः पृच्छति। वाहिवाहानां मेघानां वृंदं समूहं कान्न
मयति निर्वापयति इति पृष्टे प्रत्युत्तरं। रवान्। वनाग्नीन्। दवदावौ वनारण्यवन्ही इत्यमरः। पुनः पृच्छति। स
संततं अतिमात्रं। मात्रापरिमाणविशेषमतिक्रम्य वर्तते इत्यतिमात्रं सुचिरं। जगतां मनः सुखोभूतानां मि
जयं दृष्टिगोचरस्था जगः। कीदृशः। कथंभूतो मुदं हर्षं वितरति पृच्छतीति पृष्टे प्रत्युत्तरं। अरविंदवान्। कमलोपलक्षित

इत्यर्थः। द्वानि ति द्वितीयाविभक्तिः बहुवचनं च। अरविंद्वानि ति। प्रथमाविभक्तेरेकवचनं। एतन्नशब्दार्थवचनविभक्तिभिन्नसंज्ञमप्यमेतत्॥५२॥

१३

पदार्थलिंगवचनविभिन्नस्याप्युदाहरणं यथा। कीदृक्षमिति। कस्मिन्नपुरुषः कमपि विद्वांसं पृच्छति। समिति संग्रामे। समित्या
जिसमिद्युधस्समरः। कीदृशं। बलं सैन्यं शत्रुं निहंति घातयति। प्रश्नोत्तरं। अभि। न विद्यते भीर्भयं यस्य तत्। भयरहितसैन्यं
शत्रुं निहंतीत्यर्थः। पुनः पृच्छति। सदा सर्वदा। विष्णोर्मनसि चित्ते का मुदं तनोति प्रीतिं विस्तारयति। प्रश्नोत्तरं। मा लक्ष्मीः।
लुब्धकैः सच्छरः अभिमुखं तूणीषु सं। किं निगद्यते किमुच्यते। प्रश्नोत्तरं। अनिषु। न विद्यते इषवो बाणा यस्मिन्त
नु। पुनः पृच्छति। अपमान एव अनादर एव। पंचत्वे मरणे: समं तुल्यं केषु इति पृष्टे प्रश्नोत्तरं। अभिमानिषु। अभि
मानयुक्तेषु। पंचत्वं मरणमस्त्रः कालधर्म इति लोयाचं नकोशः॥५४॥ एकार्थलिंगवचनभिन्नस्य द्वितीयमुदा
कीदृक्षं समिति बलं निहंति शत्रुं विष्णोः का मनसि मुदं समातनोति। लुब्धं सच्छराभिमुखं निगद्यते किं पंचत्वेः स
ममपमान एव केषु॥५४॥ अभिमानिषु॥ घनसमये शिखिषु स्यान्नृत्यं कीदृक्षु किं घनात्पतति। प्राप्तवि
कस्य न गमनं मानसगमनाय कीदृशा हंसाः॥५५॥ समुत्सुकमनसः॥ एकार्थलिंगवचनं भिन्नं च। प्रभिन्नमत्तातिः।
हरणमाह। घनेति। कस्मिन्पुरुषः कमपि विद्वांसं पृच्छति। घनसमये। घनो मेघस्तस्य समये काले वर्षाकाल इत्यर्थः।
कीदृक्षु कीदृशेषु। शिखिषु मयूरेषु। नृत्यं स्यात् नर्तनं भवतीति पृष्टे प्रश्नोत्तरं। समुत्सु सहर्षेषु। पुनः पृच्छति। [illegible]नोत्
मेघात् किं पतति। प्रश्नोत्तरं। कं जलं। प्रावृषि वर्षाकाले कस्य। गमनं गतिर्न स्यात् इति पृष्टे प्रश्नोत्तरं। अनसः शकटस्य।
क्लीबेनः शकटोस्या स्त्रीत्यमरः। मानसं मानससंज्ञकं देवानां सरस्तडागः तं प्रतिगमनं मानसगमनं तस्मै। मा
नसगमनाय हंसाः मरालाः। कीदृशा भवंतीति पृष्टे प्रश्नोत्तरं। समुत्सुकमनसः। उत्कंठितचेतसः। प्रायः वर्षा
काले हंसा मानसे निवसंतीति। अनस इति नपुंसकलिंगं षष्ठ्येकवचनं च। समुत्सुकमनस इति पुल्लिंगो बहुवचनं॥५५॥

घ१

१४

वि॰मु॰मं॰

उक्तार्थलिंगवचनभिन्नं। प्रभिन्नवृत्तजातिः समाप्ता॥ प्रकारांतरमाह॥ अर्थेति। केचन। चिरत्ना अन-
भिज्ञा इतियावत्॥ सुकुमारधियः कोमलप्रज्ञाः अर्थमात्रेण भेदेन अर्थमात्रएवकृतो भेदो यस्मिन्स
तथा। तेन भिन्नं भेदवं धत्ते इति यस्मिन्नप्रस्तुतप्रस्तुतं। विदध्वे। अस्मात्तरपुनः तैः विदग्धैर्नादृतं तच्छ्ला-
घनीयं न स्यात्। यथा प्रदर्शयति॥ ५६॥ आनंदयतीति। भूतले पृथिव्यां अयं यः पुमान् अतिमात्रं सज्जनाने-
व साधूनेव आनंदयति। प्रस्तुतं मित्रोदयः। मित्राणां सुहृदां उदयः। पुनः अर्थमात्रभेदेन [illegible]॥

अर्थमात्रेण भेदेन भिन्नं बध्नंति केचन। सुकुमारधियस्तच्च विदग्धैर्नादृतं यथा॥ ५६॥ आ-
नंदयति कोऽप्यर्थसज्जनानेव भूतले। प्रबोधयति पद्मानि तमांसि च निहंति कः॥ ५७॥ मित्रोदयः।
अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये॥ प्रियस्य कीदृशी कांता तनोति सुरतोत्सवं॥ ५८॥ मदनवती॥

पद्मानि कः प्रबोधयति। पुनः तमांसि अंधकाराणि कः निहंति। प्रस्तुतं तदेव। मित्रोदय इति। मित्रस्य
सूर्यस्योदयः॥ ५७॥ उदाहरणांतरमाह॥ अटवीति। कश्चन पुरुषः चतुरां प्रियतमां पृच्छति। हे प्रिये। की-
दृशी अटवी वनस्थली दुर्गमा भवति। प्रस्तुतं तु मदनवती। मदनो धनो धत्तूरस्तेन युक्ता। मातुलो
मदनश्चैव धत्तूरः कनकाह्वयः। ताराचंद्रः॥ कीदृशी कांता प्रियस्य सुरतोत्सवं मैथुनोत्सवं तनोति वि-
स्तारयति। प्रस्तुतं तदेव। मदनवती। मदनः कामस्तद्युक्ता कामिनीत्यर्थः॥ ५८॥ [illegible]॥

मु॰टी॰

१४

21

इदानीं ग्रंथकर्त्ता शिष्यानुपदिशन्नाह । भिन्नाविति । पूर्वश्लोके द्वयोरुदाहरणे मदनवती मित्रो द्वय इत्यत्रार्थ
मात्रैक्यमेवाद्रुक्तः । शब्दभेदस्तु नोक्तः । अतो विदग्धैर्नोदाहरणीयमित्युक्तं । तस्मात्प्रश्नकुशलैः स्वयंशब्दा
र्थौ भिन्नौ कर्त्तव्यौ । शब्दभेदेऽर्थभेदश्च पृथक्कर्त्तव्यौ । लिंगादिषु लिंगविभक्तिवचनेषु यथाशक्ति । य
थामतिः विपश्चितः पंडिता भेदमाकुर्वन्तु इति ॥ ५१ ॥ तारा चेदृष्टा तायमस्या विद्वन्मनोहराख्यायां टी
कायां नव कथिताः प्रश्नाः प्रथमे परिच्छेदे ॥ १ ॥ पूर्वपरिच्छेदे व्यस्तादि प्रभिन्नकालानां नेव प्रश्नाना

भिन्नावेव स्वयं कर्त्तव्यौ शब्दार्थौ प्रश्नकोविदैः । लिंगादिषु यथाशक्ति भेदमाकुर्विपश्चितः ५१ ॥
इति श्रीधर्मदासकृतौ विदग्धमुखमंडने प्रथमः परिच्छेदः ॥ १ ॥ विशेषणं विशे[illegible]
ष्यं च यत्र प्रश्ने विधीयते । भेदाभेदक्रमात्कुर्यात् प्रश्नं प्रश्नविदां यथा ॥ १ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

मुदाहरणान्युक्तानि । इदानीं भेदाभेदक्रमजातेर्लक्षणमुच्यते । विशेषणमिति ॥ यस्मिन्प्रश्ने ऐकया
स्य विशेषणं विशेष्यं च विधीयते क्रियते । तं प्रश्नं प्रश्नविदः । भेदभेदक्रमात्कुः प्रोचुः । तत्प्रश्ने यथा
गेव स्यतीत्यर्थः । विमत्सर इत्यत्र एकस्मिन्वाक्ये सर इति विशेष्यं । विमद्दिति विशेषणं वस्यति ॥ १
५ ॥ ५ ॥

१५

वि॰मु॰मं॰

मध्यमे द्वन्द्वजातेरुदाहरणद्वयं श्लोकाभ्यामाह ॥ कीदृगिति ॥ स्वेच्छाविहारिणां मत्स्यानां ॥ कीदृक् ॥ किं ॥ हितं च
स्यादिति पृष्टे प्रत्युत्तरं ॥ विमलसरः ॥ विमलाः वि: पक्षी लघुलं ॥ सरस्तडागं ॥ विमलमिति विशेषणं ॥ सर इति विशेष्य
मुक्तं पुनः पृच्छति ॥ परेषां गुणैरन्येषां सच्चरितैः कीदृशः पुमान् अत्यर्थं मोदते ॥ हर्षितो भवति प्रत्युत्तरं ॥
विमत्सरः ॥ अन्यशुभद्वेषरहितः ॥ मत्सरोन्यशुभद्वेष इत्यमरः ॥ २ ॥ आगस्त्येनेति ॥ आगस्त्येन कुम्भजे
न मुनिना पयोराशेः समुद्रात् कियत्प्रमाणं पीतं ॥ कियत्प्रमाणं किं तु च्छितं ॥ किंस्यकमिति पृष्टे प्रत्युत्तरं
कीदृक्किं स्यान्मत्स्यानां हितं स्वेच्छाविहारिणां ॥ गुणैः परेषामत्यर्थं मोदते कीदृशः पुमान् ॥ १ ॥ विमत्सरः ॥
अगस्त्येन पयोराशेः कियत्किं पीतमुच्छ्रितं ॥ तथा वैरिकुलं वीर समरे कीदृशं हतं ॥ असकलकं ॥ इति मे
घभेद्वन्द्वजातिः ॥ दीर्घवृत्तेन यस्य प्रभुत्तरं क्रियते ह्रस्वाक्षरात् ओजस्वीति विख्यातं दर्जितं च केचन ॥ ४ ॥
सकलकं ॥ पीतं सकलं कं उच्छ्रितं ॥ सर्वं जलं पीतं सर्वं जलं कं उच्छ्रितमित्यर्थः ॥ अत्र सकलमिति विशेषणं ॥ कमिति
विशेष्यं ॥ कं शिरोजलमास्यालमित्यमरः ॥ हे वीर त्वया समरे युद्धे वैरिकुलं शत्रुवृंदं कीदृशं हतमिति पृष्टे
प्रत्युत्तरं ॥ सकलंकं ॥ कलंकेन सहितमित्यर्थः ॥ ३ ॥ भेद्यभेदद्वन्द्वजातिः ॥ ओजस्विनाल लक्षणमाह ॥ दीर्घेति ॥ यत्र
